# कथापूर्तिः / परिच्छेदापूर्तिः।

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा कथां / परिच्छेदं पुनर्लिखत।**

१. अहमेको छात्रोऽस्मि। मम **अभिधानं** प्रहर्षोऽस्ति। अहं दिल्लीनगरस्य **एकस्मिन्** प्रतिष्ठिते विद्यालये दशम्यां कक्षायां पठामि। मम विद्यालयः चतुर्दिक्क्षेत्रे **प्रसिद्धः** अस्ति। अहं स्वगृहात् प्रातरेव सप्तवादने विद्यालयस्य **वाहनेन** पठितुं गच्छामि। वाहने अन्येऽपि मम **सहपाठिनः** मिलन्ति, यैः सह मनोरञ्जनं कुर्वन्नहं विद्यालयं गच्छामि। तत्र विद्यालयस्य परिश्रमिणः **शिक्षकाः** मां श्रद्धया पाठयन्ति। तेषां सङ्गतिं प्राप्य अहमतिप्रसन्नो भवामि। मम विद्यालये देशस्य प्रसिद्धाः नेतारः, क्रीडकाः, अभिनेतारः, वैज्ञानिकाः अपि **यथासमयं** समागच्छन्ति, स्वजीवनविषये च छात्रान् बोधयन्ति। अनेन छात्राः समयानुसारं स्वकल्याणार्थं **मार्गदर्शनं** प्राप्नुवन्ति, स्वजीवने च सफलाः भवन्ति। मम विद्यालयः वास्तविकरूपेण विद्यामन्दिरोऽस्ति।

(**शब्दमञ्जूषा :** शिक्षकाः, एकस्मिन्, अभिधानम्, यथासमयम्, सहपाठिनः, प्रसिद्धः, वाहनेन, मार्गदर्शनम्)

२. 'लोके न किमपि अशक्यं नाम' इति कोऽपि **विदेशीयो** महापुरुषः प्राह। 'अशक्यम्' इति एतत् पदं **मूर्खाणामेव** कोशे लभ्यते, इति अन्य कश्चन महापुरुषः। 'अशक्यमपि शक्यं भवति **प्रयत्नात्**' इति एकस्य सत्पुरुषस्य सुभाषितम्। अतो **मानवेन** प्रयत्न एव सततं कर्तव्यः। आलस्यं **सर्वथा** विनाशाय कल्पते। आलस्येन गतं प्रदीर्घमपि जीवितं न **जीवितम्**। महान्तोऽपि गुणाः **निष्फलाः** यदि ते न उपयुज्यन्ते। यः सर्वं कालं **निद्रया** नयति स खलु मृत एव मन्तव्यः।

(**शब्दमञ्जूषा :** मानवेन, सर्वथा, जीवितं, विदेशीयो, निद्रया, मूर्खाणामेव, प्रयत्नात्, निष्फलाः)

३. अधुना सर्वत्र सन्तगाडगेबाबा - नागरी स्वच्छताभियानस्य **प्रसारः** भवति। एतद् अभियानं तु अतीव **उपयुक्तम्**। स्वच्छतायाः महत्त्वं तु **सर्वे** जानन्ति। किन्तु न केवलं स्वगृहस्य स्वच्छता अपि तु परिसरस्य स्वच्छतात्र **अभिप्रेता**। सुहृदः अत्र एकत्रीभूय वयं सर्वे **अस्मिन्** अभियाने सहभागिनः भवेम तथा तस्य लाभार्थिनः अपि भवेम। एकस्मिन् दिने किमपि **परिवर्तनं** न जायते। किन्तु सर्वत्र **विविधैः** अल्पसमूहैः अङ्गीकृतं स्वच्छताभियानं **शनैः शनैः** सफलीभवेत्। जलबिन्दुनिपातेन क्रमशः पूर्यते घटः। स हेतुः सर्वविद्यानां धनस्य अभियानस्य च।

(**शब्दमञ्जूषा :** परिवर्तनं, प्रसारः, अस्मिन्, सर्वे, उपयुक्तम्, शनैः शनैः, विविधैः, अभिप्रेता)

४. वर्षाकाले **कज्जलवर्णैः** मेघैः वारंवार व्याप्तं भवति गगनम्। ग्रीष्मे तप्ता वसुधा **जलधाराभिः** शाम्यति। महता वेगेन **प्रवहन्ति** नद्यो नदाश्च। वर्षासमये जलवर्षणे सञ्जीवितानि सस्यानि **प्ररोहन्ति**। सर्वा भूमिः **सस्यशामला** सञ्जायते। वर्षाकालः खलु न केवलं **कृषीवलानाम्** अपि तु सर्वस्य जगतः जीवितम्। **सलिलेन** विना न कदापि सस्यं तिष्ठेत्। लोकोऽपि नैव तिष्ठेत् सस्यं विना। यद्यपि वसन्तः **ऋतुराजः** इति प्रख्यातः, तथापि वर्षाकाले स्थिताः सकलस्य भुवनस्य प्राणाः।

(**शब्दमञ्जूषा :** ऋतुराजः, सस्यशामला, कृषीवलानाम्, सलिलेन, कज्जलवर्णैः, जलधाराभिः, प्ररोहन्ति, प्रवहन्ति)

५. सुनीता अनीता च माधवदासस्य **द्वे** कन्ये। सुनीतायाः पतिः मालाकारः तथा अनितायाश्च **कुम्भकारः**। एकदा सुनीता पित्रे कथितवती तात, प्रभूतं पर्जन्यः **वर्षतु** इति मे इच्छा येन **अस्माकं** वनस्पतयः पर्याप्तं जलं **प्राप्स्यन्ति**। तच्छ्रुत्वा अनीता अवदत्, न, न, तात, अहं तु चण्डातपं कामये येन अस्माकं मृद्घटाः **सुरक्षिताः** स्युः। उभयोः कामनाम् **आकर्ण्य** माधवदासः तूष्णीं स्थितः। **मनसि** अवदत् 'अहमत्र किं वदामि?'

(**शब्दमञ्जूषा :** सुरक्षिताः, द्वे, प्राप्स्यन्ति, आकर्ण्य, कुम्भकारः, वर्षतु, अस्माकम्, मनसि)

६. सन्तशिरोमणिना रामदासस्वामिना एकं वैश्विकसत्यं **कथितम्**। अस्मिन् **जगति** न कोऽपि सर्वसुखी विद्यते। पूर्वसञ्चितानुसारम् अस्मिन् जन्मनि सुखदुःखानि **भोक्तव्यानि**। **सर्वे** जनाः सुखं कामयन्ते। किन्तु दुःखस्यानन्तरं सुखम् आगच्छति। तदा **दुःखेन** विषण्णीभूत्वा किमर्थं दुःखं द्विगुणीकर्तव्यम्? वास्तवं जीवनं **त्यक्त्वा** कल्पनाविश्वे मनुजः रममाणः भवति। यदि तस्य मनः प्रशिक्षितं भवेत् तर्हि स जीवने **आनन्दं** निर्मातुं शक्नोति। 'मनाचे श्लोक' नाम स्वामिमहोदयस्य **मराठीभाषायां** लिखितः ग्रन्थः नाम मनसः प्रशिक्षणस्य शास्त्रशुद्धा प्रकिया।

**(शब्दमञ्जूषा :** भोक्तव्यानि, त्यक्त्वा, कथितम्, सर्वे, मराठीभाषायां, जगति, दुःखेन, आनन्दम्)

७. एकदा सर्वे ग्रामस्थाः सम्मिल्य एकस्य ग्रामीणस्य **विषये** चर्चाम् अकुर्वन्। बहुभिः जनैः स प्रशंसितः। अन्ततः एकः जनः अवदत् सः उत्तमः जनः अस्ति, इत्यत्र नास्ति **सन्देहः**। परन्तु तस्मिन् द्वौ दोषौ **वर्तेते** इति मे प्रतिभाति। तच्छ्रुत्वा अपरः अपृच्छत् कौ तौ दोषौ? **ज्ञातुम्** इच्छामि। सः शीघ्रकोपी तथा कोपावेशे सः कार्याकार्यविवेकं न रक्षति। **संयोगवशात्** यस्य विषये वार्तालापः प्रचलितः आसीत् स एव तत्र आगतः। अन्तिमं वाक्यं तस्य श्रवणपथे आपतितम्। स्वस्य आलोचकस्य **उपरि** उत्पत्य ग्रीवया तं गृह्णन् सः अपृच्छत्, रे शठ, मां **शीघ्रकोपी** इति वदसि? किं ते धाष्ट्र्यम्। तव कण्ठनोदनं करोमि अधुना। उपस्थिताः अन्ये जनाः तस्य रक्षणार्थं प्रयतमानाः अवदन्, भवान् स्वयमेव प्रमाणीकृतवान् यत् तस्य **आलोचना** न मिथ्या।

**(शब्दमञ्जूषा :** सन्देहः, आलोचना, संयोगवशात्, वर्तेते, विषये, उपरि, ज्ञातुम्, शीघ्रकोपी)

८. महाराष्ट्रराज्ये रायगडः नाम सुविख्यातः दुर्गः। एकदा हिरकणी दुग्धविक्रयार्थं रायदुर्गं **गन्तुम्** उत्सुका। किन्तु तस्याः शिशुः अद्यापि न सुप्तः। यदा दोलारूढः शिशुः सुप्तः तदा हिरकणी **दुर्गं** प्रस्थिता। दुर्गे दुग्धविक्रयार्थं अधिकः **कालक्षेपः** अभवत्। सूर्ये अस्तमिते दुर्गद्वाराणि पिहितानि। आवृत्तं महाद्वारं **विलोक्य** सा द्वारोद्घाटनाय रक्षापुरुषं प्रार्थयत परं सूर्योदयसमये एव द्वारम् उद्घाटनीयम् इति **शिवभूपस्य** आज्ञाम् अनुसृत्य सः तद् न उद्घाटितवान्। अस्वस्थचित्ता सा इतस्ततः अभ्रमत्। तस्याः नयनयोः पुरतः केवलं तस्याः शिशुः आसीत्। पुत्रस्नेहेन सा एकस्मात् **तटात्** अवतरणं प्रारभत सुदूरम् उत्प्लुत्य भूमौ न्यपतत् **गृहं** च अगच्छत्। शिवभूपेन तस्या न केवलं प्रशंसा कृता **तस्यै** पारितोषिकमपि दत्ता।

**(शब्दमञ्जूषा :** तटात्, शिवभूपस्य, कालक्षेपः, विलोक्य, तस्यै, गन्तुम्, गृहम्, दुर्गम्)